**अपांसमुद्र** पु० समुद्रः सदनम् ६त० अलुक्स०। १ मनसि "मनो वा अपां समुद्र" इति शत०ब्रा०।

**अपाक** पु० पच–घञ् न०त०। १ पाकाभावे, भुक्तान्नादेरग्निमान्द्यादिना २ पाकाभावे च। ७ब०। तत्साधने ३ अजीर्णतारोगे। ६ब०। पाकरहिते आमे त्रि०। ४ मूर्खः पाकः ५ तद्भिन्ने, प्राज्ञे "एतनापाकाः प्राञ्चोन केचिदापय" इति ऋ० १,११०२, अपाकाः! पक्तव्यप्रज्ञाःअपरिपक्वज्ञाना इति भा०। "अदिद्युतत् स्वपाको विभावाग्ने ऋ० ६,११,। पाकः पक्तव्यप्रज्ञोमूर्खस्तद्विलक्षण इति" भा० "आ यस्मिन् त्वे स्वपाके यजत्रा" ऋ० ६,१२,२, 'अपाके प्राज्ञे" इति भा० "पाकः पक्तव्य" इति निरु०। पाकस्य द्विविधः लौकिकः अलौकिकश्च तत्र लौकिकः दहनादिसाध्यः अलौकिकस्तु द्विविधः कालकृतपरिणतिभेदः जटराग्निसाध्यश्च तत्र तण्डुलादेः पाकः लौकिकः, आम्रफलादेः कालकृतः, भुक्तान्नादेः जठराग्निकृतः वैद्यकप्रसिद्धः। स च सुश्रुते दर्शितः "विपाकः प्रधानमिति" कस्मात्? सम्यङ्मिथ्याविपाकत्वादिह सर्व्वद्रव्याण्यभ्यवहृतानि सम्यग्मिथ्याविपक्वानि गुणं दोषं वा जनयन्ति। तत्राहुरन्ये प्रतिरसं पाक इति। केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकं चेति तत्तु न सम्यगभूतगुणादागमाच्चाम्लो विपाको नास्ति पित्तं हि विदग्धमम्लतामुपैत्यग्नेर्मन्दत्वात्। यद्येवं लवणोऽप्यन्यः पाको भविष्यति श्लेष्मा हि विदग्धो लवणतामुपैति मधुरो मधुरस्याम्लोऽम्लस्यैवं सर्व्वेषामिति केचिदाहुर्दृष्टान्तं परिदिशन्ति यथा तावत् क्षीरं स्थालीगतमभिपच्यमानं मधुरमेव स्यात्तथा शालियवमुद्गादयः प्रकीर्णाः स्वभावमुत्तरकालेऽपि न परित्यजन्ति तद्वदिति। केचिद्वदन्त्यबलवन्तोबलवतां वशमायान्तीत्येवमनवस्थितिस्तस्मादसिद्धान्त एषः। आगमे हि द्विविध एव पाकोमधुरः कटुकश्च तयोर्म्मधुराख्योगुरुः कटुकाख्यो लघुरिति तत्र पृथिव्यप्तेजोवाय्वाकाशानां द्वैविध्यं भवति गुणसाधर्म्याद्गुरुता लघुता च पृथिव्यापश्च गुर्व्यः, शेषाणि लघूनि, तस्माद्द्विविध एव पाक इति। भवन्ति चात्र।

द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः। निर्व्वर्त्तन्तेऽधिकास्तत्र पाको मधुर उच्यते॥ तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु तु। निर्व्वर्त्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते॥ पृथक्त्वदर्शिनामेष वादिनां वादसंग्रहः। चतुर्णामपि सामर्थ्यमिच्छन्त्यत्र विपश्चितः॥ तद्द्रव्यमात्मना किञ्चित् किञ्चिद्वीर्य्येण सेवितम्। किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा॥ पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात्। रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठमतः स्मृतम्॥ जन्म तु द्रव्यरसयोरन्योऽन्यापेक्षकं स्मृतम्। अन्योऽन्यापेक्षकं जन्म यथा स्याद्देहदेहिनोः॥ वीर्य्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः। रसेषु न वसन्त्येते निर्गुणास्तु गुणाः स्मृताः॥ द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न षड्रसाः। श्रेष्ठं द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः॥ अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः। आगमेनोपयोज्यानि भेषजानि विचक्षणैः" इति॥ तदुभयाभावः अपाकः। वैद्यकोक्तापाकलक्षणमुक्तं निदाने "अङ्गमर्द्दोऽरुचिस्तृष्णा आलस्यं गौरवं ज्वरः॥ अपाकः शून्यताङ्गानामामवातस्य लक्षणमिति"। गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमसृक् प्रदुष्य, वृत्तं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकमिति" माधवः। पाकः अल्पः ६ तद्भिन्ने त्रि०। "सेनयाग्नेरपाकचक्षस" इति ऋ० ८।७५।७। "अपाकचक्षसः अनल्पचक्षस" इति भा०। अधिकं पाकशब्दे वक्ष्यते।

**अपाकज** त्रि० न पाकाज्जायते जन–ड न०त०। १ पाकजभिन्ने "अपाकजानुष्णाशीतः स्पर्शस्तु पवने मत" इति भाषा०।

**अपाकरण** न० अप+आ+कृ–ल्युट्। १ निराकरणे। "तदपाकरणायाहेति" प्रश्न०उ०भा०। "ऋणत्रयापाकरणान्नास्त्यपवर्ग इति" गौ०सू० अपसारणे, दूरीकरणे च। "निधाय वत्सापाकरणं पूर्व्ववदिति" का० ४१२।२५।

**अपाकरिष्णु** त्रि० अप+आ+कृ–बा० इष्णुच्। १ दूरीकरणशीले २ अपसारणशीले।

**अपाकर्त्तोस्** अव्य० अप+आ+कृ–कृत्यार्थे तोसुन्। १ अपाकर्त्तव्ये तस्य च भावलक्षणत्वमौपाधिकम्।

**अपाकर्म्मन्** न० अप+आ+कृ मनिन् निरासे।

**अपाकशाक** पु० न पच्यते शाको यस्य। १ आर्द्रके। तस्य मूलमेव भोजनार्थं पच्यते न शाकः।

**अपाकिन्** त्रि० न पाकोऽस्त्यस्य इनि॥ १ पाकशून्ये अपाके।

**अपाकृत** त्रि० अप+आ+कृ–क्त। १ निशारिते २ दूरीकृते "अपाकृतस्वेदलवामरुद्भिरिति" रघुः। [ २ अपसारणे च।

**अपाकृति** स्त्री अप+आ+कृ–भावे क्तिन्। १ दूरीकरणे।

**अपाकृत्य** अव्य अप+आ+कृ–ल्यप्। १ निराकृत्येत्यर्थे "ऋणत्रयमपाकृत्य मनोमोक्षे निवेशयेदिति" मनुः।

**अपाक्रिया** स्त्री अप+आ+कृ–भावे श। १ अपाकरणे २ अपसारणे "ऋणानामनपाक्रियेति" उपपातकगणनयां स्मृतिः